च चतुरङ्कोभागः चत्वारोऽङ्काश्चिह्नान्यस्मिन्निति व्युत्पत्तेः तस्मै, कृतनामध्वते, यदा द्यूते प्रवृत्तानां मध्ये स कोऽपि जयति तदा तस्मै कृतनामध्वते विजिताय अधरैयाः संयन्तीति सम्बन्धः तदर्थं व्याचष्टे तदर्थमिति अधरेयान् व्याकरोति त्रेतेति। अत्रस्य यस्मिन् भागे त्रयोऽङ्काः स त्रेतानामायः यत्र तु द्वावङ्कौ स द्वापर नामायः। यत्र एकोऽङ्कः स कलिनामाय इति। तादर्थ्येनेतराङ्कानामन्तर्भावमुक्तं व्यक्तीकरोति चतुरङ्क इति तदन्तर्भवन्ति तस्मिन् कृताये त्रेतादयस्ते ऽन्तर्भवन्ति महासंख्यायामवान्तरसंख्यान्तर्भावः प्रसिद्ध इति" आनन्दगिरिः। यन्ति शाराः अस्मिन् इण—आधारे अच्। द्यूते सर्वशारगन्तव्ये ७स्थलभेदे अयानयशब्दे विवरणम्। अयते अच्। ८गन्तरि त्रि०। चिदया आ नाम ऋ०६,६६,५।

**अयःपान** न० अयः द्रवीभूतं तप्तलौहं पीयतेऽत्र ल्युट्। नरकभेदे यथा भाग० ५स्कन्धे तामिस्रादिनरकगणनायाम् वीचिरयःपानमित्युक्त्वा तद्विवरणं सहेतुकं तत्रैवोक्तं 'यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुराः व्रतस्थो वा पिबति प्रमादतः तेषां निरयं नीतानामुरसि पदाक्रम्य वह्निना द्रवमाणं कार्ष्णायसं निषिञ्चन्ति" इति।

**अयःशूल** न० अय एव शूलम् उपतापकम्। १तीव्रे उपतापे, २लौहकृतास्त्रभेदे च। वा सत्वम्, अयश्शूलमप्यत्र।

**अयक्ष्म** त्रि० नास्ति यक्ष्मा रोगोयस्य वेदे नि०अच् समा०। १नीरोगे रोगशून्ये "यथा नः सर्वमिज्जगदयक्ष्मं सुमना असतः यजु० १६,४ अयक्ष्मं नीरोगम् वेददी०। ५व०। २उपद्रवासाधने ' तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज " यजु०१६,११, 'अयक्ष्मया निरुपद्रवया' वेद दी०

**अयज्ञ** त्रि० नास्ति यज्ञो यस्य। अकृतयज्ञे। 'पनीं अयज्ञ ग्रथा अयज्ञान्" ऋ० ७,६,३,।

**अयज्ञिय** त्रि० न यज्ञाय हितः यज्ञ—घ न०त०। १यज्ञकर्म्मणि दातुमनर्हे १माषादौ "अयज्ञिया वै माषा"श्रुतिः यज्ञकाले ऽनुच्चार्य्येऽपशब्दे च अयज्ञियवाग्वचने भ०भ० ३यज्ञं कर्त्तुमनर्हे असंस्कृतेऽनुपनीतादौ "अयज्ञिया वै गर्भास्तमेतं ब्रह्मणैव यजुषा यज्ञियं करोति" शत०ब्रा०।

**अयज्यु** त्रि० यज—वा० उ नि० युट् न०त०। १यष्टृभिन्ने २यज्ञविघातके च 'शासस्तमिन्द्र मर्त्यमयज्युं शवसस्पते! ऋ० १,१३१,४ " यज्ञे दयज्योर्विभजातिभोजनम् " ऋ०२,२६,१

**अयज्वन्** पु० विधिनेष्टवान् यज्वा न०त०। अकृतयज्ञे। "अयज्वानमदक्षिणमभिश्वत्येति व्याहरन्" भा०द्रो०प० षोड़शधा पाठः। "योऽनाहिताग्निः शतगुरयज्वा च सहस्रगुः" 'अयज्वनान्तु यद्वित्तमासुरं वै तदुच्यते" मनुः।

**अयत** त्रि० न यम्यते यम—क्त न०त०। १अकृतयमे अकृतेन्द्रियनिग्रहे। यतते यत—अच् न०त०। २यत्नशून्ये।

**अयत्न** पु० अभावे न०त०। १यत्नाभावे आयासाभावे "तदवाप्नोत्ययत्नेन यो हिनस्ति न कञ्चन" मनुः। न०ब०। २प्रयासशून्ये त्रि० "तद्योधवारवाणानामयत्नपटवासताम्" रघुः।

**अयत्नवत्** त्रि० न यत्नवान्। १यत्नशून्ये "तेन तुल्यम् क्रिया चेद्वति" 'तत्र तस्येवेति" पा० वा वति। २यत्नशून्य तुल्यक्रियादौ ३यत्नशून्यस्य समाने च अव्य०।

**अयथा** अव्य० यथा योग्यत्वे न०त०। यस्य यथा विधानसुचितं १तथा करणाभावे २अनुचितकरणे ३मिथ्याभूते च नास्ति यथा योग्यत्वं यत्र। ४अयोग्ये ५अयत्ने च त्रि०। "तस्मा अयथं कपर्देतत्" ऋ० १०,१८,१५ "अयथमयत्नेन लीलया" भा०।

**अयथातथ** त्रि० यथा योग्यं तथा न भवति "यथातथयथा पुरयोरिति" पा०निर्द्देशात् नि० स०। १अयथार्थे यत् यदर्थं क्रियते तस्मिन् तदर्थमभूते च। "दैवे कर्म्मणि पित्र्ये च तद्गच्छत्ययथातथम्" मनुः। यत् कर्म्म यदर्थं क्रियते तन्न साधयति" कुल्लू० तस्य भावः ष्यञ् वा पूर्व्वपदवृद्धिः आयातथ्यम् अयाथातथ्यञ्च तद्भावे न०।

**अयथार्थ** त्रि० विरोधे न०त०। यथार्थभिन्ने मिथ्याभूते यथा अयथार्थानुभवः। स च तदभाववति तत्प्रकारकं ज्ञानं तच्च त्रिविधम् संशयभ्रमारोपरूपतर्कज्ञानभेदात्। तेषां सर्वेषाम् तदभाववति तत्प्रकारकज्ञानरूपत्वात्तथात्वम्

**अयथावत्** अव्य० अयोग्यरूपमर्हति अर्हार्थे वति। अननुरूपे यथोचितभिन्ने। [२खले त्रि०।

**अयथेष्ट** अव्य० न०त०। १इच्छानुरूपाभावे। अर्श आद्यच्

**अयन** न० अय—भावे ल्युट्। १गतौ, दक्षिणत उत्तरस्याम्, उत्तरतश्च दक्षिणस्यां सूर्य्यस्य चन्द्रस्य च २गतौ, तथाहि द्वादशराश्यात्मकस्य राशिचक्रस्यार्द्धं मकरावधिमिथुनपर्य्यन्तम् राशिषट्कं क्रमेण उत्तरावनतं तत्र स्थितोऽर्कश्चन्द्रो वा स्वगत्या प्राचीं गच्छन्नपि किञ्चित् किञ्चित्तिर्य्यग्गत्या उत्तरामभिक्रामति, एवं कर्कटादिधनुःपर्य्यन्तं राशिषट्कं क्रमेण दक्षिणावनतं तत्र स्थितोऽर्कश्चन्द्रो वा प्रागवत् दक्षिणामेवाभिक्रामति सेयं गतिरयनशब्देन ज्योतिषे व्यव-